# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ५ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः, महाभाष्यमञ्च | |

**सूचना -** निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ निम्नलिखितासु परिभाषाद्वयं व्याख्येयम्।** १०

१ अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते

२ पुरस्तादपवादा अनन्तरान् विधीन् बान्धते नोत्तरान्।

३ प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते।

**प्रश्नः २ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते परिभाषा सावतरणं व्याख्येया।** १०

**प्रश्नः ३ वर्णादाङ्गं बलीयो भवति परिभाषायाः सावतरणं व्याख्या कार्या।** १०

**प्रश्नः ४ निम्नलिखितासु परिभाषाद्वयं व्याख्येयम्।** १०

१ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते।

२ ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति।

३ उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।

**प्रश्नः ५ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् परिभाषायाः सावतरणं व्याख्या कार्या।** १०

**प्रश्नः ६ गतिकोरकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः परिभाषा सावतरणं व्याख्येया।** १०

**प्रश्नः ७ निम्नलिखितेषु वार्तिकद्वयं यथाभाष्यं व्याख्येयम्।** १०

१ कार्यकालं संज्ञापरिभाषम्।

२ संयोगसंज्ञायां सहवचनं यथान्यत्र।

३ न वाऽतज्जातीयव्यवायात्।

**प्रश्नः ८ न धातुलोप आर्धधातुके सूत्रस्य यथाभाष्यं व्याख्या कार्या।** १०

**प्रश्नः ९ दीधीवेवीटाम् सूत्रस्य यथाभाष्यं व्याख्या कार्या।** १०

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं देयम्।** १०

१ अन्तरङ्गे किम् असिद्धं भवति ?

२ पूर्वपठितः अपवादः कं विधिं बाधते ?

३ मध्ये पठितः अपवादः कं विधिं बाधते ?

४ उत्सर्ग-अपवाद-शास्त्रयोर्मध्ये किं शास्त्रं बलवद् भवति ?

५ प्रकल्प-शब्दस्य परित्यज्य इत्यर्थः कस्य मते अस्ति ?

६ अयस्कुम्भी इत्यत्र कुम्भी-शब्दस्य केन शब्देन ग्रहणं भवति ?

७ युवन्-शब्दस्य द्वितीयाविभक्तेः बहुवचने किं रूपं सम्पन्नं भवति ?

८ युवन्-शब्दस्य स्त्रीलिङ्गे किं रूपं सम्पन्नं भवति ?

९ सूत्रे लिङ्गग्रहणम् अतन्त्रं भवति/न भवति ?

१० विभक्तिकार्ये लिङ्गविशिष्टस्य ग्रहणम् भवति/न भवति ?

११ न धातुलोप आर्धधातुके सूत्रे लविता कस्य प्रत्युदाहरणं विद्यते ?

१२ पवितुम् इत्यत्र कः प्रत्ययः ?

१३ उपेद्धः इत्यत्र कः प्रत्ययः ?

१४ बेभिदिता इत्यत्र को धातुः ?

१५ स्तुतम् इत्यत्र स्तु + त इत्यवस्थायां केन सूत्रेण लघूपधगुणस्य निषेधो भवति ?

****